सामवेदीया सन्ध्योपासना

__/__/__

अथ प्रातः सन्ध्या ॥ शुद्धासने प्राङ्मुख उपविश्य मनसा गायत्रीं पठित्वा शिखाबन्धनं कुर्यात् ॥ ततः वामहस्ते कुशात्रयं दक्षिण हस्ते कुशद्वयं धृत्वा ॥ मन्त्रः पवित्रीधारणम् :-

पवित्रं ते विततं ब्रह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतः ।

अतप्ततनूर्न तदामो अश्नुते श्रृतास इद्वहन्तः सं तदाशत ॥

ततः आचमनम् :- ॐ केशवाय नमः ॥ ॐ नारायणाय नमः ॥ ॐ माधवाय नमः ॥ ॐ गोविन्दाय नमः ॥ इति हस्तप्रक्षालनम् ॥ अङ्गुष्ठमूलेन मुखं द्विरुन्मृज्य ॥ ^ जलार्द्रहस्तेन संस्पृशेत् । ॐ विष्णुर्विष्णुः । ॐ वाक् वाक् । ॐ प्राणः प्राणः । चक्षुश्चक्षुः । ॐ श्रोत्रं श्रोत्रं । नाभिः । ॐ हृदयम् । ॐ कण्ठः । ॐ शिरः । ॐ शिखा । ॐ बाहुमूले । इति ततः किञ्चिदुदकं भूमौ स्रावयेत् । आचम्य ॥

शिखामन्त्रः (वैकल्पिक / परंपरया) :- मानस्तोक इति मन्त्रस्य कुत्स ऋषिः जगती छन्दः एको रुद्रो देवता शिखाबन्धने विनियोगः ॥

ॐ मानस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः ।
मा नो वीरान्रुद्र भामिनो वधीर्हविष्मन्तः सदमित्त्वा हवामहे ॥

प्राणायाम :- ॐ कारस्य ब्रह्मा ऋषिः (दैवी) गायत्री छन्दः परमात्मा देवता । भूरादिसप्तव्याहृतीनां विश्वामित्रजमदग्नि-भरद्वाजगौतमात्रिवसिष्ठकश्यपा ऋषयः गायत्र्युष्णिगनुष्टुब्बृहती-पंक्तित्रिष्टुब्जगत्यश्छन्दांसि अग्निवायुसूर्यबृहस्पतिवरुणेन्द्र-विश्वेदेवा देवताः । तत्सवितुरित्यस्य विश्वामित्र ऋषिः गायत्री छन्दः सविता देवता । आपोज्योतिरिति प्रजा (प्रजापतिर्ऋषिः यजुश्छन्दः ब्रह्माग्निवायुसूर्या देवताः प्राणायामे विनियोगः ॥ अंगुष्ठतर्जनीभ्यां ॥

ॐ भूः । ॐ भुवः । ॐ स्वः । ॐ महः । ॐ जनः । ॐ तपः । ॐ सत्यम् ।

ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ।
ॐ आपोज्योतिरसोमृतं ब्रह्म भूर्भुवस्वरोम् ॥ एवं त्रिः सप्त षोडशं आचामेत् ॥ (B)

:- सामवेदीय वैभव त्रिवेदी :-

A- पाद शिरो उदकाभ्युक्ष्य । B अमन्त्रकाचमनम् । प्राणायामत्रयं कुर्यात् ॥

(२)

सामवेदीया सन्ध्योपासना

__/__/__

सङ्कल्पः– ॐ ममोपात्त दुरितक्षयद्वारा ब्रह्मवर्चसकामार्थं श्रीपरमेश्वर प्रीत्यर्थं प्रातः सन्ध्योपासनमहङ्करिष्ये ॥

मार्जनम्:– ॐकारस्य ब्रह्माऋषिः गायत्रीछन्दः परमात्मा देवता । महाव्याहृतीनां प्रजापतिर्ऋषिः गायत्र्युष्णिगनुष्टुप् छन्दांसि अग्नि-वायुसूर्योदेवताः । तत्सवितुरित्यस्य विश्वामित्रऋषिः गायत्रीछन्दः सवितादेवता । आपोहिष्ठेति तिसृणां सिन्धुद्वीपऋषिः गायत्री छन्दः आपो देवता मार्जने विनियोगः ॥

[सोदकबिन्दुभिः कुशैः अनामिकामध्यमाभ्यां वा चतुः शिरः सिञ्चेद् यथा:– ओमित्येकम्, महाव्याहृतिरिति द्वितीयं, गायत्र्या तृतीयं, आपोहिष्ठाभिः तिसृभिः चतुर्थं । क्वचित् यस्यक्षयायजिन्वथ इति मन्त्रेण पादावभ्युक्षयति नवपदैरिति]

ओ म ॥ भूर्भुवः स्वः ॥ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥ ॐ आपो हि ष्ठा मयो भुवः । ॐ तान ऊर्जे दधातन । ॐ महे रणाय चक्षसे । ॐ यो वः शिवतमो रसः । ॐ तस्य भाजयते ह नः । ॐ उशतीरिव मातरः । ॐ तस्मा अरङ्गमामवः । ॐ यस्य क्षयाय जिन्वथ । आपो जनयथा च नः ।

A) प्राणायामानन्तरं भस्मधारणं कुर्यात् । ऊर्ध्वपुण्ड्रं त्रिपुण्ड्रं वा तिलकं कृत्वा सङ्कल्पः । भस्मः वा तिलकं धारणं
~~भगवन्नामस्मरणम् वा तिलकधारणम्~~
भगवन्नामस्मरणम् वा मन्त्रोच्चारः करणीयः ॥

÷ सामवेदीयः वैभवः त्रिवेदी ÷

सामवेदीया सन्ध्योपासना

अभ्युप्राशनम् (A) :- सूर्यश्चेति नारायणऋषि: प्रकृति छन्द: सूर्यो देवता आचमने विनियोग: || ततो हस्ते जलमादाय ||

सूर्यश्चमा मन्युश्च मन्युपतयश्च मन्युकृतेभ्य: पापेभ्यो रक्षन्ताम् यद्रात्र्या पापमकार्षं मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना रात्रिस्तदवलुम्पतु यत्किञ्चिद्दुरितं मयि इदमहं माममृतयोनौ सूर्ये ज्योतिषि जुहोमि स्वाहा। इति मन्त्रेण तूष्णीं द्विराचामेत् ।

अघमर्षणम् :- (B) ऋतञ्चेति तृचस्य माधुच्छन्दसोऽघमर्षण ऋषि: अनुष्टुप् छन्द: भाववृत्तो (C) देवता अघमर्षणे विनियोग: ||

ऋतञ्च सत्यञ्चाभीद्धात्तपसोऽध्यजायत । ततो रात्र्यजायत तत: समुद्रो अर्णव: । समुद्रादर्णवादधि सम्वत्सरो अजायत । अहो रात्राणि विदधद्विश्वस्य मिषतो वशी । सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् । दिवञ्च पृथिवीञ्चान्तरिक्षमथो स्व: ||

अर्घ्यम् :- प्रणवस्य ब्रह्माऋषि: दैवी गायत्रीछन्द: परमात्मा देवता महाव्याहृतीनां प्रजापतिर्ऋषि: गायत्र्युष्णिगनुष्टुप् छन्दांसि अग्निवायुसूर्या देवता: । तत्सवितुरिति विश्वामित्र ऋषिर्गायत्री छन्द: सविता देवता सूर्यार्घ्यदाने विनियोग: ।

(A) अत्र यद्यपि रघुनन्दनेनाह्निकतत्वे, "साममाग्निश्चमेत्युक्त्वा प्रात: सूर्येत्युपस्पृशेत् । आप: पुनन्तु मध्याह्ने ततश्चाचमनं चरेदि"ति भरद्वाजवचनात् समन्त्रकमाचमनं लिखितं तथापि न तत्प्रमाणकोटिमाधरोहति छन्दोगानां सन्ध्याविषये गोभिलेनानुक्तत्वात् । यत्तु मैत्रायणीयगृह्ये "प्रात: सूर्यश्चमेत्युक्त्वा सायमग्निश्चमेति च । आप: पुनन्तु मध्योह्ने मध्याह्ने कुर्यादाचमनं ।"
(B) "करेणोद्धृत्य सलिलं घ्राणमासज्य तत्र च जपेदनायतासुर्वा त्रि: सकृद्वाघमर्षणम्" इति । प्राणान् नियम्यन वा नियम्य || (C) भाववृत्त: मनसाप्यगोचरत्वाद् ब्रह्मण: "यतो निवर्तन्ते अप्राप्य मनसा सहेति" श्रुते: ||

÷ सामवेदीय: वैभव: त्रिवेदी ÷

सामवेदीया सन्ध्योपासना

ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥ इति अञ्जलिदानं तत्र प्रत्यञ्जलि मन्त्रपाठः ॥ (A)

ततः प्रदक्षिणमावृत्य आचम्य, स्वस्तिकाकृतहस्तः सूर्यमुपतिष्ठेत् ॥

उपस्थानम् - ॐ उदुत्यमिति प्रस्कण्व ऋषिर्गायत्री छन्दः सूर्यो देवता, चित्रमित्यस्य कुत्सऋषिः त्रिष्टुप् छन्दः सूर्यो देवता सूर्योपस्थाने विनियोगः ।

उदुत्यं जातवेदसं देवं वहन्ति केतवः । दृशे विश्वाय सूर्यम् ।

चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ।

आप्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च ॥

(A) कालातीतप्रायश्चित्तार्घ्यं करिष्ये -

प्रातः - यदद्यकच्च वृत्रहन्नुदगा अभि सूर्य ।

सर्वं तदिन्द्र ते वशे ।

मध्याह्ने - उद्घेदभि श्रुतामघं वृषभं नर्यापसम् । अस्तार मेषि सूर्य ॥

सायंकाले - न तस्य मायया च न रिपुरीशीत मर्त्यः ।

यो अग्नये ददाश हव्यदातये ॥

(B) आचार्यगोभिलप्रणीतायाः - सामवेदीयाप्रातःसन्ध्यापद्धतौ तर्पणन्नास्ति । माध्याह्निकसन्ध्यापद्धतावास्ति । तत्तु ब्रह्मयज्ञानन्तरं ।

÷ सामवेदीयः वैभवः त्रिवेदी ÷

(५) सामवेदीयसन्ध्योपासना

गायत्र्यावाहनम् पूर्वा सन्ध्या तु गायत्री रक्ताङ्गी रक्तवाससा ।
अक्षसूत्रधरा देवी कमण्डलुसमन्विता ॥
हंसस्कन्धसमारूढा तथा च ब्रह्मदेवता ।
कुमारी ऋग्वेदमुखी ब्रह्मणा सह आवह ॥
आयाहि वरदे देवी त्र्यक्षरे ब्रह्मवादिनी(नि) ॥
गायत्रि-च्छन्दसां मातर्ब्रह्मयोने नमोऽस्तुते ॥

जपम् - ओंकारस्य ब्रह्माऋषिः दैवी गायत्री छन्दः परमात्मा देवता । महाव्याहृतीनां प्रजापतिर्ऋषिः गायत्र्युष्णिगनुष्टुप् छन्दांसि अग्निवायुसूर्यादेवताः । तत्सवितुरित्यस्य विश्वामित्रऋषिः गायत्री छन्दः सविता देवता जपे विनियोगः ॥
इत्युक्त्वा करमालया रुद्राक्षमालया वा तिष्ठन् मौनी प्रणव-व्याहृतियुतां गायत्रीमष्टोत्तरशतमष्टाविंशतिदशौ वा सञ्जप्य ॥

जपार्पणम् :- अनेन गायत्रीजपकृतेन श्रीपरमेश्वरः प्रीयताम् ॥

सन्ध्याविसर्जनम् :- उत्तरे शिखरे जाता भूम्यां पर्वतवासिनी ।
ब्रह्मणा समनुज्ञाता गच्छ देवि यथासुखम्
इति विसृज्य द्विराचामेत् ।

अत्र जपारम्भे मुद्रान्यासशापोद्धारश्च अनिवार्यो नास्ति, यतोहि अस्य निषेधो कुत्रापि न लभ्यते । अतःअस्मिन् शङ्कायाः आवश्कता नास्ति ।

सङ्कलनकर्ता- सामवेदीयः वैभवः त्रिवेदी,
(श्रीमालनगर राजस्थान, हाल मुम्बई)
Youtube - Samvedeey Vaibhav Trivedi